करुणाया लब्धं जीवनम् ।

कदाचित् केशवः नाम बालकः आसीत् । तस्य पिता बाल्यकाले एव मृत्युः अभवत् । तदनन्तरं सः मात्रा साकं अवर्तत । सः पठितुं समर्थः आसीत् । अतः विद्यालये सर्वेषां प्रियङ्करः आसीत् केशवः ।

केशवस्य सन्तोषः आसीत् तस्य मातुः सन्तोषं । विद्यालये तं अनेकानि मित्राणि सन्ति । किन्तु तस्य उत्तममित्रं तस्य माता आसीत् । तथा सः मात्रा साकं सन्तोषेण अवर्तत ।

एकदा विद्यालयात् प्रत्यागतः केशवं प्रति तस्य माता अवदत्, 'पुत्र तव माता रोगबाधिता भवति । मम मरणं आगच्छति इति अहं जाना-मि ।' तत् श्रुत्वा सः दुःखितः अभवत् । तदा माता अवदत्, 'पुत्र चिन्तामास्तु । मम मरणानन्तरं मम पुत्रः अनाथः न

भविष्यति । तव रक्षणाय कोऽपि नूनं आगमिष्यति ।'

दिनानन्तरं केशवस्य माता मृत्युः अभवत् । तदनन्तरं सः मातुलस्य गृहे अवर्तत । किन्तु तत्र सन्तुष्टः नासीत् । तत्र सः अनाथः सन् तूष्णीम् अवर्तत । सः पठितुं, विद्यालयं गन्तुं च नोत्सुकः अभवत् । ~~तदन~~

दिनानि अतीतानि । तस्य विद्यालये एका नूतनाध्यापिका आगच्छत् । सा अनाथा आसीत् । तस्याः गृहे कोऽपि नासीत् । अतः सा सदापि विषण्णा आसीत् । तत् दुःखं विस्मरणार्थं सा सदा कापेन अतिष्ठत् । किन्तु कोपेन तस्याः दुःखं सदा अवर्धयत ।

एकदा अध्यापिका केशवस्य वृतान्तं अशृणोत् । तत् श्रुत्वा सा तस्य मातुलस्य गृहं अगच्छत् । तदा विषण्णः क्षीणितः च केशवं अपश्यत् ।

सा करुणार्द्रहृदया अभवत् । सा तं स्वगृहं आनीतवती । तदनन्तरं तं भक्षणं नूतनवस्त्राणि च अददात्। तदा केशवस्य क्षीणं अगच्छत् । किन्तु तदापि सः दुःखितः आसीत् ।

एकदा अध्यापिका तं विद्यालयं आनीतवती । तदा विद्यालये सर्वाणि छात्राणि, अध्यापिकाः च तं सन्तोषेण स्वीकृतवान् । तदा केशवः सन्तुष्टः अभवत् । तदनन्तरं सः प्रतिदिनं विद्यालयं अगच्छत् ।

दिनानि अतीतानि । सः अवधानतया मातुः मरणस्य दुःखं विस्मरितवान् । पठितुं उत्सुकः अभवत् । तस्य सन्तोषं, पठितुं उत्साहं च पश्य अध्यापिका अतीव सन्तुष्टा अभवत्। एकदा केशवः अध्यापिकां प्रति अवदत् ; तव करुणया लब्धं जीवनं भवति मम जीवनं । मम मातुः

मरणानन्तरं मम जीवनं समाप्तः इति अहं चिन्तितवान् । किन्तु तव रूपेण मम माता प्रत्यागतः ।' तत् श्रुत्वा अध्यापिका सन्तोषेण तं आलिङ्कनं अकरोत् । सः पुनरपि अवदत्, ' अध्यापिका, तव कारुण्यं माम् नूतन-जीवनं अददात् । अधुना अतः भवती मम माता एव इति अहं पुनरपि वदामि ' । तत् श्रुत्वा अध्यापिका अतीव सन्तुष्टा अभवत् ।

तदनन्तरं केशवः अध्यापिका च सन्तोषेण अवर्तत ।